TITLE

1. पक्षतावादः ।
2. धर्मितावच्छेदकवादार्थः ।
3. नव्यमतवादार्थः ।

धर्मतावच्छेदकवादार्थप्रारंभः

श्रीवेदव्यासाय नमः गणेशाय नमः ॥ अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः समवायघटितसामानाधिकरण्यं। तेनैक
कपुरुषीयपरामर्शदशायां तद्भिन्नपुरुषांतरस्य नानुमितिः ॥ तस्य समवायरूपकारणतावच्छेदकसंबंधेन परामर्शानधिकरण।
त्वात्। नवीनास्तु समानधर्मितावच्छेदकत्वमनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः ॥ सामानाधिकरण्य।
प्रत्यासत्तिकल्पे एकधर्मावच्छिन्नविशेष्यकपरामर्शदशायामन्यधर्मावच्छिन्नविशेष्यकानुमित्यापत्तिवारणाय धर्मिता
तावच्छेदकतायाः विशेष्यतायां निवेशनीयतया धर्मितावच्छेदकभेदेन कार्यकारणभावबाहुल्यप्रसंगात् ॥ मन्मते तु समान
हेतुत्वेन धर्मितावच्छेदकत्वप्रत्यासत्त्यैव तादृशातिप्रसंगभंगात् ॥ धर्मितावच्छेदकमनिवेश्यैव न्यनुमितित्वावच्छिन्नं प्रति वह्नि
३ कल्पनीयतया व्याप्यधूमवत्तानिश्चयत्वेन हेतुतायां तद्भेदेन न कार्यकारणबाहुल्यं ॥ नन्वेतत्कल्पेपि वह्निव्याप्यधूमवद्द्रव्यं पर्वतो
घटवानित्येतादृशपरामर्शकाले पर्वतो वह्निमानित्यनुमित्यापत्तिः ॥ तादृशपरामर्शस्यापि धर्मितावच्छेदकतासं
बंधेन पर्वतत्ववत्त्वादिति वाच्यं। वह्निविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमितिं प्रति वह्निव्याप्यधूम

६५ तन्मतेपिधर्मितावच्छेदकावधयापुरुषनिवेशस्यावश्यकत्वाच्च ॥ ५६

प्रकारतानिरूपितविशेष्यतावच्छेदकतावसंबंधेन [illegible]

[illegible] परामर्शहेतुत्वकल्पनात् ॥ तादृशपरामर्शश्चितादृशसंबंधेनपर्वतत्वेऽसत्वेनतत्रपर्वतत्वावच्छिन्नविशेष्य

तानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितेरापादनासंभवात् ॥ नचैतत्कल्पेएकपुरुषीयपरामर्शकालेपुरुषांतरस्या

उमितौतत्पुरुषीयत्व नुमितिवारणायतत्पुरुषीयत्वमवश्यंनिवेशनीयं ॥ तथाचपुरुषभेदेनकार्यकारणभावबाहुल्यमिति ।च्यं ॥ पुरुषा[illegible]नलाघव

पेक्षयाविषयाणामधिकतयाविषयभेदेनकारणतावाहुल्यकल्पनापेक्षयापुरुषभेदेनतद्बाहुल्यकल्पनस्यैवो

चितत्वात् ॥ ५ ॥ केचित्तु ॥ समवायसंबंधेनवह्निविधेयकानुमितित्वावच्छिन्नंप्रतिसमवायेनतादृशावच्छेदकतासं

बंधेनवह्निविधेयकानुमितित्वावच्छिन्नंप्रतिचतादृशावच्छेदकतासंबंधेनपरामर्शस्यहेतुताकल्प्यते ॥ अतोने

कपुरुषीयपरामर्शादि[illegible]न्यस्यानुमितेरेकधर्मावच्छिन्नविशेष्यकपरामर्शादिपरधर्मावच्छिन्नविशेष्यकानुमितेर्वा नि

पत्तिः ॥ अथैवमपिचैत्रस्यपर्वतत्वावच्छिन्नविशेष्यकामैत्रस्यचद्रव्यत्वावच्छिन्नविशेष्यकः परामर्शस्तदाचैत्रस

ता ता

२ ता१ द्रव्यत्वावच्छिन्नविशेष्यकानुमितेर्मैत्रस्य पर्वतत्वावच्छिन्नविशेष्यकानुमितेश्चापत्तिः॥ समवायेन वह्न्यनुमितिजनकस्य कीभूत
वह्निव्याप्यवत्ताज्ञानस्य समवायेन चैत्रमैत्रयोर्विशेष्यतावच्छेदकतासंबंधेनानुमितिजनकीभूतस्य च तादृशसंबंधेन
द्रव्यत्वपर्वतत्वयोः सत्वादिति चेन्न॥ एकधर्मावच्छिन्नंप्रत्युभयविधप्रत्यासत्या यत्रैकधर्मावच्छिन्नहेतुता तत्र विलक्ष एक
णाया एव सामग्रीव्याप्तेरभ्युपगंतव्यतया तादृशातिप्रसंगभंगात्॥ धर्मावच्छिन्ननिष्ठ्या दृशसंबंधा
वच्छिन्नकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्या यदधिकरणप्रत्यासन्नस्यैतद्धर्मावच्छिन्ननिष्ठ कारणतावच्छेदकावच्छिन्नस्य
यादृशसंबंधावच्छिन्नकार्यतांतरनिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्याऽधिकरणं यत्तादृशसंबंधेन
स्य तदधिकरणसंबंधेन कार्यतावच्छेदकावच्छिन्नस्य नाधिकरणमित्येव सामग्रीव्याप्तिः प्रकृते स्वीकरणीया
स्वकारणतावच्छेदकं॥ उपदर्शितस्थले च चैत्रस्य पर्वतत्वावच्छिन्नविशेष्यकानुमितिरुत्पद्यते॥ वह्न्यनु
मितित्वावच्छिन्ननिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नकारणता श्री
घटकप्रत्यासत्त्यान्वेत्रात्मप्रत्यासन्नस्य वह्निव्याप्यवत्ताज्ञानस्य वह्न्यनुमितित्वावच्छिन्ननिष्ठविशेष्यतावच्छे

प्रास प्रास

दकत्वप्रत्यवच्छिन्नकार्यतान्तरनिरूपितत्वावच्छिन्नकारणताघटकीभूतविशेष्यतावच्छेदकत्वप्रत्यासत्त्यवच्छिन्नाधिकरणता

त्वे याः पर्वते सत्वात्॥ तस्य समवायेन चैत्रात्मसंबंधवह्न्यनुमितित्वावच्छिन्नस्य विशेष्यतावच्छेदकत्वप्रत्यासत्त्यवच्छि

न्नाधिकरणत्वव्याप्यवत्त्वाभावात्॥ एवं मैत्रस्य द्रव्यत्वावच्छिन्नविशेष्यकानुमितिरे[illegible]त्सद्यते॥ ननु चैत्रादेर्द्र वो

व्यत्वावच्छिन्नविशेष्यकानुमितिः॥ समवायेन चैत्रात्मसंबंधस्य व्याप्यवत्ताज्ञानस्य विशेष्यतावच्छेदकतासंबं

त्व धेन द्रव्यत्वादावसत्वात्॥ द्रव्यत्वादेश्चैत्रो[illegible]संबंधवन्ह्यनुमितित्वावच्छिन्ननिरूपितविशेष्यतावच्छेदकत्वप्रत्या

सत्त्यवच्छिन्नाधिकरणतानियामक[illegible]भावादिति॥ तत्तद्रूपीयत्वादिकमनिवेश्यैव विशेष्यतावच्छेदकत्वप्रत्या

सत्यका[illegible]र्यकारणभावकल्पनसंभवतीति वदंति॥ उ[illegible]पचमः॥ ॥ चैत्रस्य वन्हिव्याप्यवान्पर्व

तइत्येतादृशपरामर्शदशायां तस्य पर्वतो वन्हिमानिति सिद्धिसत्वेपि पर्वतो वन्हिमानित्येतादृशानुमित्याप

त्तिः॥ समवायेन चैत्रात्मप्रत्यासन्नस्य वन्हिव्याप्यवत्ताज्ञानस्य विशेष्यतावच्छेदकतया पर्वते सत्वात्॥ नच

त्वे

धर्मितावाद

५×कारणतानिरूपितकार्यताश्रयद्रव्यत्वावच्छिन्नविशेष्यकवन्ह्याद्यनुमित्यात्मकयत्किंचिद्व्यक्तिनिष्ठसमवायसंबंधावच्छिन्न×५

२ नकारणतावच्छेदकसंबंधेनतत्कारणतावच्छेदकावच्छिन्नाधिकरणेतत्कारणतानिरूपितायाःकार्यतायाःतदाश्रययत्किंचि
द्व्यक्तिनिष्ठतदवच्छेदकसंबंधावच्छिन्नकार्यत्वांतरनिरूपितकारणतावच्छेदकीभूतनिखिलधर्मावच्छिन्नविशेष्यत्व
स्यापिनिवेशनीयत्वात् सिध्यादिकालेनानुमित्यापत्तिः॥तदानींसमवायेनव्याप्यवत्ताज्ञानवतश्चैत्रस्यसमवा
यसंबंधावच्छिन्नकार्यतांतरनिर्णयनिष्ठकारणतानिरूपितकार्यतासमानाधिकरणतत्कार्यतावच्छे कसम
६ वायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकंयावत्[illegible]गतंतथाविधसिध्यभावत्वावच्छिन्नविशिष्ट
त्वाभावादितिवाच्यं॥तदानींपर्वतोवन्हिमानितिसेनादृशासिध्यभावासत्वेपिवन्हिव्याप्यवत्ताज्ञानत्वावच्छिन्नका ७
र्यतानिरूपितकारणतावच्छेदकीभूतद्रव्यत्वावच्छिन्नविशेष्यकसिध्यभावत्वघटितनिखिलधर्मावच्छिन्ना
[illegible]नांचैत्रासत्वात्॥अथसिद्धेद्रव्यत्वावच्छिन्नविशेष्यकवन्हि[illegible]त्वेननप्र
तिबंधकताकिंतुसामान्यतोविशेष्यतावच्छेदकत्वप्रत्यासत्यावन्हिविधेयकानुमितित्वावच्छिन्नंप्रतिविशेष्य
तावच्छेदकतासंबंधेनवन्हिनिर्णयत्वेनैवप्रतिबंधकत्वमते।इत्थंचविशेष्यतावच्छेदकताप्रत्यासत्यावन्हिव्याप्य श्री
ता वत्ता

-रणा

निर्णयाधिकरणेपर्वतत्वेतादृशासंवंधावच्छिन्नकार्यतानिरूपितकार्य[illegible]तावच्छेदकीभूतविशेष्यतावच्छेदकतासंवंधावच्छि
न्नतादृशकार्यताश्रययत्किंचिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतविशेष्यतावच्छेदकतासंवंधा
वच्छिन्नप्रतियोगिताकनिर्णयत्वावच्छिन्नाभावत्वावच्छिन्नसत्वात्॥नतत्रविशेष्यताव[illegible]दकत्वप्रत्यासत्यावन्ह्य
वच्छिन्ना नुमितित्वापा[illegible]तेरितिचेन्न॥सामान्यतोवन्ह्यनुमितित्वावच्छिन्नं लिवान्हेनिर्णयत्वावच्छिन्नभावत्वेनहेतुतानसंभ
वतिपुरुषांतरीयपर्वतत्वावच्छिन्नविशेष्यकवन्हिमत्तानिर्णयकालीनपर्वतत्वावच्छिन्नविशेष्यकवन्ह्यनुमितोव्यभिचा
रात्॥एवंचसतिचैत्रस्य[illegible]पर्वतोवन्हिमानित्येतादृशसिद्धिकालेपिवन्हिव्याप्यवत्तानिर्णयत्वावच्छिन्नकारणतानिरू
पितकार्यताश्रयीभूतंपुरुषीयवन्हिमत्तानिर्णयाभावत्वघटितायावद्धर्मावच्छिन्नानामेवतत्रसत्वात्तत्रविशेष्य
तावच्छेदकप्रत्यासत्याऽनुमित्यापत्तेर्वारयितुमशक्यत्वात्॥तत्पुरुषीयवन्ह्यनुमितित्वावच्छिन्नंप्रतितत्पु
रुषीयवन्हिव्याप्यवत्तानिर्णयत्वावच्छिन्नकारणतानिरूपितकार्यताश्रययत्किंचिदनुमितित्वे[illegible]व॥तंन्निष्ठकार्य
+ किंतुतत्पुरुषीयवन्ह्यनुमितित्वावच्छिन्नंप्रतितत्पुरुषीयवन्हिमत्तानिर्णयत्वावच्छिन्नाभावत्वादिनाहेतुतावाच्या॥+४
१२ ज्ञानत्वेनहेतुत्वेतुचैत्रीयवन्हिव्याप्यवत्ता ×१

+३ पुरुषीयवन्हिव्यापकीभूतानुमितित्वावच्छिन्नकार्य ×३
३ ताभिरूपितकारणतावच्छेदकीभूतत्व ३

५ × स्वावच्छिन्नकारणताघटकप्रत्यासत्त्याप्रत्यासंन्नस्यव्यक्तिधर्मावच्छिन्नस्यतद्व्यक्तिनिष्ठयत्संबंधावच्छिन्नकार्यतातदरनिरूपित × ५

६ तानिरूपितकारणतावच्छेदकाः यावंतो धर्मास्तिदंतर्गत चैत्रीयवह्निमत्तानिर्णयाभावत्वमपि तदवच्छिन्नस्य च चैत्रीयपर्वतत्वावच्छिन्नविशेष्यकवह्निमत्तानिर्णयदशायां पर्वतेपि सत्वेन तदाविशेष्यतावच्छेदकताप्रत्यासत्तौ च तत्रानुमितित्वान्नवच्छिन्नापत्तिरिति तत्सुरूपीमत्वनिवेशानमावश्यकमिति॥ अत्रेदं समाधानमाकलयामः॥ ॥स्वधर्मावच्छिन्नव्यक्तिव्यक्तिनिष्ठयत्संबंधावच्छिन्नकार्यतानिरूपितस्वेतरकारणतावच्छेदकीभूताः यावंतो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टतदधिकरणेन तत्संबंधावच्छिन्नतद्व्यक्तिनिष्ठकार्यतानिरूपितस्वेतरकारणतावच्छेदकावच्छिन्नकारणता(टकप्रत्यासत्त्याप्रत्यासंन्नस्यव्यक्तिं च धर्मावच्छिन्नस्य तद्व्यक्तिनिष्ठयत्संबंधावच्छिन्नकार्यतातरनिरूपितस्वेतरका)[illegible] वच्छेदकीभूतायावंतो धर्माः प्रत्येकं तद्धर्मावच्छिन्नकूटविशिष्टं यत्तत्संबंधावच्छिन्नतद्व्यक्तिनिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्त्याधिकरणं यत्तत्संबंध[illegible]सन्नस्य तद्धर्मावच्छिन्नस्य तत्संबंधेनाधिकरणमित्येव सामग्रीव्याप्तिरूपेयते॥ एवं च चैत्रस्य वह्निव्याप्यवान्पर्वत[illegible] परामर्शकाले पर्वतो वह्नि श्री

ततदधिकरणप्रत्या × निष्ठकार्यता × ३

५ ✗ कार्यतानिरूपितकारणतावच्छेदकयावद्धर्मावच्छिन्नविशिष्टत्वं न तदा पर्वतत्वस्य विशेष्यतावच्छेदकतासंबंधावच्छिन्न ✗ ५
मानिसेनादृशासिद्धिकाले पुरुषांतरीयपर्वते वह्न्यनुमितिनिष्ठसमवायसंबंधावच्छिन्नकार्यतापिनिखिलकारण
तावच्छेदकावच्छिन्नविशिष्टत्वं न चैत्रात्मनः॥ तदात्मसमवेतत्वावच्छिन्नं प्रति तदात्मत्वेन तदात्मप्रत्यासत्त्या हेतुतायाः
कल्पनात् तदात्मत्वस्यापि तादृशकारणतावच्छेदकतया यावदंतर्गतत्वात्॥ चैत्रात्मनश्च तादात्म्यसंबंधेन तदात्म
त्वावच्छिन्नासंबंधित्वात्॥ किंतु चैत्रीयवह्न्यनुमितिनिष्ठसमवायावच्छिन्नकार्यतानिरूपितकारणतावच्छे
दकयावद्धर्मावच्छिन्नविशि[illegible]त्वमेव तस्य तद्व्यक्तिनिष्ठविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकचैत्री
त्वे५ यवह्निमत्तानिर्णयाभावस्यापि तदंतर्गततया यद्वह्निविच्छिन्नस्य पर्वतत्वे सत्त्वादिति न चैत्रसंबंधानुमिते विशेष्यता
वच्छेदकताप्रत्यासत्त्या पर्वतत्वे आपत्तिरिति॥ न च तादात्म्यसमवेतत्वावच्छि[illegible] तादात्म्येन तदात्मत्वेन हेतु
तायां मानाभावादेतादृशापत्तिवारणं न संभवतीति वाच्यं॥ विषयभेदेनानंतकारणतायां न पूर्वोक्तीय
त्वनिवेशापेक्षया विषयमात्रनिवेश्यतादृशकारणताकल्पनस्यैवोचितत्वादिति कृतं वि[illegible]॥ ॥ अथ पक्ष

धर्मितावाद

५ पक्षतावच्छेदकावच्छिन्नविशेष्यक पक्षतावच्छेदकावच्छिन्नत्वावगाहिहेतुमत्ताज्ञाना ४५

छेदकाव तावच्छेदकसामानाधिकरण्यमात्रावगाहिहेतुमत्ताज्ञानानामक्षतावच्छेदेनानुमितेरनुत्पत्त्यापर्वतत्वादिव्यापकतासं
५ सर्गकानुमितित्वावच्छिन्नं प्रति पर्वतत्वादिव्यापकतासंसर्गकहेतुमत्ताज्ञानत्वेन हेतुता वाच्या ॥ एवं च पर्वतत्वादिनिवेश
तत्र स्यावश्यकतया कृतं विशेष्यतावच्छेदकत्वप्रसासत्तिस्वी[illegible] ॥ न विशेष्यतावच्छेदकत्वप्रसासस्यनभ्युपगमे च
पर्वतत्वव्यापकतासंसर्गकत्वं निवेश्यैव पर्वतत्वद्रव्यत्वाद्यनंतधर्मभेदेन कारणताकल्पनीया ॥ तदुपगमे चता अनंत
दृशसंसर्गकस्थले एकमेव कारणत्वमिति वाच्यं ॥ पक्षतावच्छेदकावच्छिन्नत्वावगाहिन्या अनुमितेरेवोपदर्शि
पर्वत तया महानसत्वाद्यवच्छिन्नपक्षकत्वव्यापकत्वावगाहिहेतुमत्ताज्ञानानां तादृशानुमितेरप्रामाणिकत्वात् ॥ प
मात्र न्मलेप्येकैककार्यकारणभावकल्पनात् ॥ [illegible] पर्वतत्वादिकमनिवेश्य व्यापकतासंसर्गकत्वमात्रं कार्यकारण
भावे निवेशनीयमिति[illegible] ॥ पर्वतत्वस्य भावप्रतियोगितानवच्छेदकधर्मावच्छिन्नत्वरूपव्यापकतायाः निवे
शेन तद्घटकीभूतपर्वतत्वादेरपि निवेशनावश्यकत्वात् ॥ यदि च पर्वत्वादिकम[illegible]निवेश्य किंचिद्धर्माभावप्रति श्री
योगितावच्छेदकत्वावच्छिन्नाभावनिष्ठावच्छेदकतानिरूपितवह्नित्वनिष्ठावच्छेदकत्वनिरूपकं यद्वह्नि[illegible]

निष्ठमवच्छेदकत्वं तन्निरूपकयत्संयोगादिसंसर्गनिष्ठावच्छेदकत्वं तन्निरूपकवह्नित्वावच्छिन्नविधेयतानिरूपितविशे
ष्यतावच्छेदकतासंबंधेनानुमितित्वावच्छिन्नं प्रति तादृशाभावनिष्ठावच्छेदकतानिरूपकधूमत्वनिष्ठावच्छेदकतानि
रूपकधूमनिष्ठावच्छेदकतानिरूपकसंयोगादिनिष्ठावच्छेदकतानिरूपकवह्निव्याप्यधूमत्वावच्छिन्नप्रकारता
ता निरूपितविशेष्यतावच्छेदकसंबंधेन परामर्शस्य हेतुता संभाव्यते ॥ तदा महानसत्वव्यापकताघटितसंसर्गा
वगाहिनः पर्वतत्वावच्छिन्नविशेष्यकपरामर्शादपि पर्वतत्वावगाह्यनुमितेर्वापत्तिरिति ॥ अत्र केचित्तु ॥ तद्ध
र्मावच्छिन्नविशेष्यताकबुद्धौ तद्धर्मव्यापकताया एव संसर्गतया भानमभ्युपेयते ॥ नापरधर्मव्यापकतायाः ॥
इत्थं च पर्वतत्वावच्छिन्नविशेष्यताकबुद्धेर्महानसत्वव्यापकताघटितसंसर्गावगाहितयाऽक्तातिप्रसंगाभा न
वात् ॥ यदि चेत्सा दुष्करदर्शिनी रीतिरेव साधीयसी स्याद्धुः ॥ ॥ अन्ये तु वह्नित्वावच्छिन्नविधेयतानिरूपितसं
योगादिनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठावच्छेदकतानिरूपितवह्नित्वनिष्ठावच्छेदकावच्छेदकतानिरूपिता
भावनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिता

कतानवच्छेद

भावनिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकत्वप्रत्यासत्त्याऽनुमितित्वा

५८ वच्छिन्नंप्रति वन्हिव्याप्यधूमप्रकारता निरूपितसंयोगनिष्ठसंसर्गनिष्ठावच्छेदकतानिरूपितधूमनिष्ठावच्छेदक

तानिरूपितधूमत्वनिष्ठावच्छेदकतेत्येवं क्रमेणाधिकरणनिष्ठावच्छेदकतापर्यंतंनिवेश्यतदवच्छेदकप्रत्यासत्त्या

परामर्शस्य हेतुत्वांतरकल्पनान्नोक्तातिप्रसंगः ॥ नच भुधपर्वतत्वं धर्मितावच्छेदकीकृत्य नीलपर्वतत्वव्या

पकताघटितसंसर्गावगाहिनः परामर्शात्तादृशव्यापकत्वावगाहिसिद्धिकाले भुधपर्वतत्वव्यापकतासंसर्गक

नुमित्यापत्तिरितिवाच्यं ॥ स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनावच्छेदकताविशिष्टान्याऽवच्छेदकतायाए

वप्रत्यासत्तित्वोपगमात् ॥ तादृशस्थलेच पर्वतत्वनिष्ठावच्छेदकतायास्तादृशसंबंधेननीलत्वनिष्ठावच्छेदकतावि त्व

शिष्टत्वेनापत्त्यभावात् ॥ सर्वासामेवावच्छेदकतानां तादृशसंबंधेन स्वात्मकावच्छेदकताविशिष्टत्वात्तदन्या

ऽवच्छेदकत्वाप्रसिद्धिरितिवाच्यं ॥ संयोगस्येव स्वनिरूपकावच्छेदकतानिरूपितत्वादेरपि स्वस्मिन्स्वसंबंध

त्वानुपगमेनानुपपत्त्यभावात् ॥ नचैवमपि पर्वतवन्निष्ठघटाभावप्रतियोगित्वावगाहिज्ञाना पर्वतत्वव्यापक श्री

तानवच्छेदक ११ त्वावगाहि ११

आधेयत्वनिष्ठावच्छेदकतायामपि अभावत्वान्यनिष्ठावच्छेदकता

[redacted] २ न च तादृशज्ञानादनुमितिर्जायत एवेति वाच्यं व्यभिचारज्ञानाप्रतिबंध

न्यनुमित्यापत्तिः॥ आधेयत्वातिरिक्तान वह्निमत्त्व[illegible]स्याभावनिष्ठावच्छेदकतायां निवेशोपि पर्वतवृत्तिः स न महानसवृत्तित्वे

भावस्तत्प्रतियोगितानवच्छेदकतामादाय पुनस्तदापत्तिरितिवाच्यं॥ स्वनिरूपकानवच्छेदकतानिरूपितत्वसंबं

धेन [redacted] विशिष्टान्यत्वनिवेश्यतादृशापत्तेर्निरसनीयत्वादिति स्यात्॥ [redacted]थमनुपपत्तिश्चित्वनी

शुद्धसंयोगेन या॥॥ यत्र पर्वतत्वं धर्मितावच्छेदकीकृत्य महानसत्वव्यापकता विशिष्टसंयोगेन महानसत्वं धर्मितावच्छेदकीकृत्य प

र्वतत्वव्यापकता विशिष्टधूमसंयोगेन धूमवत्तानिर्णयश्च तत्र पर्वतत्वं धर्मितावच्छेदकीकृत्य पर्वतत्वव्यापकीभूतव

ह्निसंयोगेन वह्न्यनुमित्यापत्तिः॥ निरुक्तावच्छेदकत्वप्रत्यासत्त्या विशेष्यतावच्छेदकत्वप्रत्यासत्त्या च पर्वतत्वे धूमपरा

मर्शस्य सत्वादिति॥ [redacted]ने॥॥ तादृशावच्छेदकतासंबंधेनानुमितिं प्रति धूमप्रकारता विशिष्टाया विशेष्यतातद स

वच्छेदकत्वसंबंधेन परामर्शो हि तु॥ विशेष्यतायां धूमप्रकारतावैशिष्ट्यं च स्वनिरूपितसंयोगनिष्ठावच्छेदकतानिरूपि

ताया धूमत्वनिष्ठावच्छेदकतायां निरूपितायां धूमत्वनिष्ठावच्छेदकतानिरूपिताया अभावनिष्ठावच्छेदकताप्र्यंतं निवे

१४ इत्येवं क्रमेणाधिकरणानिष्ठावच्छेदकता×२

[illegible]

वच्छिन्नत्वं च न तस्यां अपि तु परं यस्या तादृशधूमप्रकारतानिरूपिताधिकरणतानिष्ठावच्छेदकत्वं

७ स्यतदवच्छेदकावच्छिन्नत्वस्वनिरूपितत्वोभयसंबंधेन निवेश्यं। उपदर्शितस्थले च पर्वतत्वावच्छिन्नविशेष्यतानतादृ
त्रे शोभयसंबंधेन धूमप्रकारताविशिष्ट[illegible] महानसत्वव्यापकताविशिष्टधूमसंयोगस्यैव पर्वतत्वावच्छिन्नविशेष्यतानि
रूपितधूमप्रकारतावच्छेदकत्वं यथा तादृशधूमप्रकारतानिरूपितत्वं पर्वतत्वावच्छिन्नविशेष्यतायां परं परं यस्या तादृशधूम
प्रकारतानिरूपितायां [illegible] धिकरणतानिष्ठावच्छेदकतानवच्छेदकत्वस्य महानसत्वे एव सत्त्वात्॥ पर्वत
त्वावच्छिन्नविशेष्यताश्रये पर्वतत्वावच्छिन्नत्वाभावादिति पर्वतत्वेन तादृशधूमप्रकारताविशिष्टविशेष्यतावच्छेदकतासं
त बंधो[illegible]न परामर्शो वर्तत इति न तावच्छेदकतासंबंधेनानुमित्यापत्तिरिति॥ अथ विशेष्यविशेष्यतावच्छेदकमनि दृशा
न वेश्य निर्णयत्वस्य दुर्वचत्वापात। निवेशने यावन्नयके तिं विशेष्यतावच्छेदकताप्रत्यासत्तिकल्पने गौरवावकाशः॥
तथाहि॥ वह्निव्याप्यधूमवत्तानिर्णयत्वं धूमाभावाप्रकारत्वे सति धूमप्रकारत्वं तदा महानसं धूमाभाववत् पर्वतो
वह्निव्याप्यधूमवानिसे[illegible]तादृशज्ञानासंग्रहः॥ तादृशज्ञानस्यापि महानसत्वविशिष्टधूमाभावप्रकारकत्वात् श्री
नापि वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशू

× धूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपित × २

× धूमाभावप्रकारता या अपि महानसत्वावच्छिन्नविशेष्यकधूमवत्ता × १

न्यत्वे सति वह्निव्याप्यधूमप्रकारकत्वं ॥ तादृशस्थले चैंशानीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशे
ष्यतानिरूपितत्वेन तस्यैवासंग्रहात् ॥ स्वीयतादृशधूमाभावप्रकारताशालित्वतादात्म्योभयसंबंधेन धूमाभावज्ञानवि
शिष्टान्यत्वनिवेशेपि वह्निव्याप्यधूमवन्महानसं वह्निव्याप्यधूमवानित्येतादृशज्ञानासंग्रहः ॥ तस्य तथाविधोभय
संबंधेन स्वात्मकधूमाभाववत्ताज्ञानविशिष्टत्वान् [illegible] स्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्व
स्वावच्छिन्नविशेष्यतानिरूपितधूमप्रकारताशालित्वोभयसंबंधेन किंचिद्धर्मविशिष्टज्ञानत्वमेव प्रकृते निर्णयत्वं
वह्निव्याप्यधूमवन्न वा महानसं वह्निव्याप्यधूमवान्पर्वत इत्यादिसमुहालंबनस्य च निरुक्तोभयसंबंधेन पर्व
तत्वविशिष्टत्वान्न तदसंग्रह इति चेन्न ॥ अस्तु तादृशनिर्णयत्वं समुहालंबनसाधारणं ॥ विशिष्यविशेष्यतावच्छे
दकमनिवेश्य सुवचं ॥ तथाप्येतादृशसंबंधे [illegible] न संभवति ॥ तथा सति तादृशसत्वात्तदनंतरं महानसं वह्निमानि
त्यनुमित्यापत्तेः ॥ एवं च तादृशसमुहालंबनरूपे [illegible] ॥ तस्य जनकतावच्छेदकत्वे तदनंतरं पर्वतो वह्निमानित्येतादृ
शानुमित्यापत्तिः ॥ तदसाधारणरूपस्य तथात्वे चोक्तातिप्रसंग इति कथंचिदपि न निस्तार इति ॥ अत्र [illegible] दाहुः ॥

मौ

× तदहतु × ३

× समुहालंबनात्मकनिश्चयस्य वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वम् सा सत्त्वा महानसत्वेपि × ३

× स्वीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्न × विशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्वतादात्म्यो × भयसंबंधेन धूमप्रकारकज्ञानविशिष्टत्वनिवेशोपि वा × २

८

अत्र कल्पे कारणतावच्छेदक कोटौ निर्णयत्वं न निवेश्यते॥ किं तु संशयानंतरमनुमित्यापत्ति वारणाय कारणतावच्छे
दकत्व प्रत्यासत्ति घटक धूमादि प्रकारतानिरूपित विशेष्यतायां धूमाभावादि प्रकारतानिरूपितत्वं निवेश्यते॥ तथा च
×धूमप्रकारतानिरूपिता१ ३ धूमाभाव प्रकारतानिरूपितं विशेष्यतावच्छेदकता प्रत्यासत्त्या शुद्ध ज्ञानत्वेनैव हेतुता॥ नन्वेवं प्रकारभेदेन विशेष्यताभेदा संशये २
निखिलज्ञानीय धूमप्रकारतानिरूपित विशेष्यतानामेव धूमाभाव प्रकारतानिरूपितत्वात्तादृश विशेषणानाम् व्यावर्तकत्वे
[illegible] ॥ संशये प्रकारभेदेन विशेष्यताभेदानभ्युपगमात्॥ न चोभय प्रकारतानिरूपितविशेष्यतायाः संशया एक ५
×कल्पन ×६ ×अ× तिरिक्त स्थानेकत्वात् संशयेऽतिरिक्तविषयता प्रसंग इति वाच्यं॥ प्रत्येक कोटि ज्ञानीय विशेष्यतायाः संशयेऽनभ्यु प्रविशेष्यताति×
पगमेन संशय समुच्चययोर्वैलक्षण्यानुपपत्त्या तत्कल्पनावश्यकत्वात्॥ न च समुच्चये [illegible] कोट्योः पर रिक्त ×८
तो ३ रस्पर विरोधस्यासंशयगोचरत्वेनैव [illegible] संशय समुच्चययोर्वैलक्षण्योपपत्तेरतिरिक्त विषय [illegible] नाभाव
इति वाच्यं॥ विरोधोपस्थितिं विनापि विशेषादर्शनकोटिस्मरणधर्मिज्ञानादितः संशयस्यानुभवसिद्धतया निखि
क१ ल संशयानां विरोधविषयत्वासंभवात्॥ अत एव दीधिति कृतेणापि क्वचिद्विरोधभानस्यापि तत्प्रयोजकत्वं श्री
का

३× भानाद्विरोधस्य ×२ ×उभय ×८

१ तथा ॥ अथ निखिलसंशयानां उभयप्रकारतानिरूपितएकविशेष्यताशालित्वं न संभवति [illegible] तथाहि

विरोधिविषयतायाः अप्रामाणिकत्वात् ३

[illegible] धीनत्वादित्यत्र कश्चिदुक्तं ॥ यत्तु संशये विरोधस्य कोट्यधिकरणयोः संसर्ग[illegible] नयैव भानो[illegible] पगमात् ॥ संसर्गज्ञा

नस्य विशिष्टबुध्यहेतुत्वात् ॥ निखिलसंशयानामेव विरोधिविषयकत्वं संभवतीति किमतिरिक्तविषयताकल्पनेने

२ यसमुच्चय ति ॥ तदसत् ॥ संसर्गविधयोः सं[illegible] योर्वैलक्षण्यानुपपत्यानत्कल्पने किमरा धूं उभयप्रकारतानिरूपितैकवि

शेष्यत्व[illegible] । नीलपर्वतत्वं धर्मितावच्छेदकीकृत्य वन्हिमाप्यधूमाभाव[illegible] पर्वतत्वं धर्मितावच्छेदकी

तदवच्छेदेन वन्हिमाप्यधूममवगाहमानस्य संशयस्य तथात्वायोगात् ॥ तत्र धूमप्रकारतानिरूपितविशेष्यता

धूमा याः नीलानवच्छिन्नत्वात्तदवच्छिन्नत्वाभावप्रकारतानिरूपितविशेष्यताभिन्नत्वात् ॥ तत्र धूमप्रकारतानिरू

त्व पितविशेष्यतायां नीलावच्छिन्नत्वोपगमे [illegible] विशिष्टपर्वतत्वं धर्मितावच्छेदकीकृत्योभयकोटिमवगाह

मानस्य संशयस्य ततो वैलक्षण्यानुपपत्तिः ॥ [illegible] तत्र धूमप्रकारतानिरूपितविशेष्यतो धूमाभावप्रकारतानि तो

रूपितनीलविशिष्टपर्वतत्वावच्छिन्नविशेष्यता [illegible] भिन्नेवास्तीं । परंतु नीलपर्वतत्वावच्छिन्नविशेष्य

भाव तायां [illegible] धूमाप्रकारतानिरूपितत्वं स्वीक्रियत इति नानुपपत्तिरिति वाच्यं ॥ तथा सति तादृशसंशया[illegible] धूप

विधूमप्रकारतानिरूपितशुद्धपर्वतत्वावच्छिन्नविशेष्यतायाः अपि ५

१ नीलपर्वतत्वं धर्मितावच्छेदकीकृत्य धूमाभावं च १

९

२ शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमप्रकारताशालिज्ञानं वा

वर्तत्वं धर्मितावच्छेदकीकृत्योभयकोटिमवगाहमानस्य संशयस्यैव वैलक्षण्यानुपपत्तिः॥ विरोधिसामग्रीदशायां नीलपर्व
तत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशालिज्ञानं जायतामित्येतादृशेच्छासत्वेनादृशज्ञानानुदयप्रसंगा
शुद्ध२ च्च॥ शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशालिप्रसक्तपर्वतत्वावच्छिन्नविशेष्यतानि
रूपितधूमाभावप्रकारताशालि [illegible] ज्ञानं जायतामित्येतादृशेच्छां नाद
शाव्यावृत्तरूपेणोत्तेजकीकृत्य विरोधिसामग्र्यां प्रतिबंधकत्वकल्पनात् नादृशेच्छासाधारणरूपेणोत्तेजकीक
त्वेन तथाविधेच्छासत्वे नीलभासकसामग्रीसत्वे शुद्धपर्वतत्वावच्छिन्नविशेष्यकवन्हिव्याप्यधूमाभावप्रकारकप्र
सक्तापत्तेः॥ न च नीलपर्वतो धूमाभाववानित्याकारकं [illegible] समुहालंबनं नीलपर्वतो
धूमाभाववान्पर्वतो धूमवानित्येतादृशज्ञानमपि न संशयपदवाच्यं। तस्य निर्णयत्वे कार्यकाले पर्वतत्वा
वच्छेदेन धूमवत्तानिर्णयस्य विरोधिनः सत्वान्नीलपर्वतत्वं धर्मितावच्छेदकीकृत्य धूमाभाववत्ताज्ञानानु
दयप्रसंग इति चेन्नैवं॥ नादृशसंशयेप्युभयप्रकारतानिरूपितैकैव विशेष्यता किंतु तस्याः पर्वतत्वा

६+ नीलपर्वतो धूमवा

ज्ञानवत्त

नीलपर्वतत्वावच्छिन्नविशेष्यताशालि

शालिधूमाभावप्रकारताशालिप्रस

प्रसज्ञानापत्तामित्ये

वह्निमत्त्वेन धूमप्रकारतानिरूपि[त]त्वं नील[illegible]वह्नि[illegible]विशिष्टपर्वतत्वावच्छिन्नत्वरूपेण धूमाभावप्रका
रतानिरूपितत्वमिति विशेषः ॥ नीलवह्निमान् पर्वतो धूमाभाववान्न वेत्यादिसंशयो विशेष्यतायामैकरूपेऽसमयप्रका
रतानिरूपितेति तेषां वैलक्षण्योपपत्तेरित्याहुः ॥ अत्रेदं विभावनीयं ॥ संशयसमुच्चययोर्वैलक्षण्योपपत्तये उभ
यप्रकारतानिरूपितमतिरिक्तविषयतामास्तां संशये ॥ किंतु तत्र प्रत्येकप्रकारतानिरूपितविशेष्यताद्वयसत्त्वेऽपि
तत्र बाधकाभावः ॥ तत्प्रयोजकसामग्र्या अपि सत्त्वात् ॥ न च तदवच्छिन्नं प्रति संशयसामग्र्याः प्रतिबंधकत्वकल्पनात्
प्रयोजकसामग्र्येव तत्र नास्तीति वाच्यं ॥ तत्र संशय[illegible]: प्रतिबंधकत्वे मानाभावात् ॥ न च प्रत्येकप्रका
रतानिरूपितविशेष्यताद्वयस्य समुच्चयसाधारण्ये संशये स्वीकृते संशयसमुच्चयवैलक्षण्यानुपपत्तिः ॥ स्य
तद्व्यावृत्तविषयतायास्तत्राभावादिति अन्यथानुपपत्त्या तादृशसामग्रीप्रतिबंधकत्वकल्पनमिति वाच्यं ॥ संशयसमुच्चयीय
[illegible] विलक्षणविषयतायाः सं[illegible]ये सत्त्वेऽपि संशयनिष्ठविलक्षणविषयतायास्तत्राभावेनैव तस्य समुच्च
यवैलक्षण्योपपत्तेः ॥ संशयत्वादिविषयताशालित्वरूपवैलक्षण्यं समुच्चयेऽनुभूयते यत्र तु[illegible]प्रकारत

कैविक्षा

१० रेणनपक्षौ सरइति ॥ एवं च धूमादिसंशयस्यापि धूमाभावप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन पर्वत
त्वादौ सत्त्वात् ततोऽनुमित्यापत्तिर्दुर्वारेति ॥ एतेन निखिलसंशये विरोधः संसर्गतया भासते नान्यत्र विरोधा तथा च
नवच्छिन्नसंयोगनिष्ठावच्छेदकतानिरूपितधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन परामर्शस्य
हेतुत्वकल्पनान्न संशयानंतरमनुमित्यापत्तिरिति परास्तं ॥ संशयस्य विरोधावच्छिन्नसंयोगादिसंसर्गक
त्वे विभुधूमसंयोगावच्छिन्नधूमादिप्रकारताशालित्वे बाधकाभावात् तदनंतरमनुमित्यापत्तेर्वारणासंभवात्
विरोधस्य संसर्गतया भाने मानाभावाच्च संशयमात्रे विरोधस्य संसर्गतयाभानोपगमे विरोधसंसर्गावच्छि पक्ष+५
न्नप्रकारतानिरूपितविशेष्यताया एककोटिकसाधारण्यात् ज्ञानाभावात् ॥ उभयप्रकारतानिरूपितौ वि तादृश
र शेष्यतयोर्भेदस्यैव कल्पयितुमुचितत्वात् तथा संयोगादिनिष्ठावच्छेदकतायां नानापदार्थघटितवि
न रोधावच्छिन्नत्वनिवेशानमपेक्ष्य धूमप्रकारतानिरूपितविशेष्यतायामभावत्वप्रकारतानिरूपितत्वनिवे त्वर
शस्यैव वक्तुमुचितत्वाच्च ॥ तत्रापदर्शितानुपपत्तेः प्रकृतेपि तुल्यत्वादिसंगमसदाग्रहेण ॥ केचित्तु स्वनि श्री

रूपकज्ञाननिरूपितत्वस्वावच्छेदकावच्छिन्नत्वोभयसंबंधेन धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टायावि
शेष्यतातदन्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वकारणताघटकप्रत्यासत्तिः॥ वह्निव्याप्यधूमवान्नवा
पर्वतनद्व इत्यादिसंशयात्मकज्ञानीयधूमप्रकारतानिरूपितविशेष्यता[illegible]च तथाविधोभयसंबंधेन तदीयधू
माभावप्रकारतानिरूपितविशेष्यताविशिष्टत्वेतिनानुपपत्तिः॥ निर्णयात्मकज्ञानीयविशेष्यताया अपि स्वा
वच्छेदकावच्छिन्नत्वसंबंधेन संशयात्मकज्ञानीयधूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टत्वास्वनि
रूपकज्ञाननिरूपितत्वनिवेशः॥ ज्ञानभेदेन च विषयताभेदोपगमान्नानुपपत्तिः॥ धूमवान्नवामहा
नसं धूमवान्पर्वतनद्व से तादृशज्ञानीयधूमप्रकारतानिरूपितं महानसत्वावच्छिन्नविशेष्यताविशिष्टा
तास्वावच्छेदकावच्छिन्नत्वनिवेशः॥ ननु नीचपर्वतत्वावच्छेदेन धूमाभावं ऊर्ध्वपर्वतत्वसामानाधिक
रण्येन धूममवगाहमानाः समुहालंबनबोधः तदनंतरं पर्वतो वह्निमानित्येतादृशानुमित्यनुपपत्तिः॥
पर्वतनिष्ठविशेष्यताया अपि स्वनिरूपकज्ञाननिरूपितत्वसंबंधेन तदीयधूमाभावप्रकारतानिरूपितत्व ३

धर्मितावाद

९ + विशिष्टान्यत्वमेव धूमप्रकारतानिरूपितविशेष्यता ९ +

तादृशज्ञानीयधूमप्रकारतानिरूपितविशेष्यतायास्तदीयधूमाभावप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छि
११ न्नतयाउभयसंबंधेन तादृशविशेष्यताविशिष्टत्वात्॥ न च धूमाभावप्रकारतानिरूपितविशेष्यतायां धूमा
भावत्वानवच्छिन्नप्रकारतानिरूपितयत्किंचिद्धर्मावच्छिन्नविशेष्यताभिन्नत्वनिवेशान्नानुपपत्तिः॥ तादृ
शज्ञानीयधूमाभावप्रकारतानिरूपितविशेष्यताया धूमाभावत्वानवच्छिन्ननीलप्रकारतानिरूपितपर्वत
त्वावच्छिन्नविशेष्यताभिन्नत्वादिति वाच्यं॥ एवं सति नीलपर्वतत्वावच्छेदेन धूमाभावप्रकारक[illegible]स्य पर्वतत्वाव कभु
अ च्छेदेन धूमप्रकारकसंशयादप्यनुमित्सापत्तिः इति चेन्न॥ स्वावच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य सामाना
धिकरण्येन हेतुमत्ताज्ञानस्य च साधारणरूपेणैव हेतुत्वं॥ सामानाधिकरण्यप्रत्यासत्तिकल्पेऽपि न संभव
अस्माभिः॥ तीत्यन्यत्र प्रपंचितं॥ एवं चावच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायास्तादृशविशेष्यताभिन्नत्वाविशि शि
ष्टितधूमाभावप्रकारतानिरूपितविशेष्यतायां निवेशनीयमतो नोक्तसंशयादनुमित्सापत्तिः॥ [illegible]मा सा
नाधिकरण्यमात्रावगाहिहेतुतायां तादृशविशेष्यताभिन्न^विशेष्यताविशिष्टान्यत्व^निवेशनीयमतो न श्री

शीन१ + त्वविशेषितधूमाभावप्रकारतानिरूपित + १ + मेव धूमप्रकारतानिरूपितविशेष्यतायां + १

नुप१ पदर्शितसमुहा६२लंवं नादनुमित्याॅपत्तिरिति॥ नचैवं नीलपर्वतत्वावछेदे नधूमाभावप्रकारातत्सामानाधिकरण्ये
दृ२ नचधूमप्रकारकसंशयाॅनुमितिस्यापत्तिरितिवाच्यं॥ धूमप्रकारतानिरूपितविशेष्यतायामवधिधूमान्यप्रकारता
निरूपितविशेष्यतायामप्रिकिंचिधर्मावछिन्नविशेष्यताभिन्नत्वस्य निवेशात्॥ नचेवं नीलपर्वतोवन्हिव्याप्य
वानित्याकारकपरामर्शादनुमित्यनुदयप्रसंगइतिवाच्यं॥ तादृशपरामर्शान्नीलपर्वतोवन्हिमानित्याकारका यार्
नुमितेरेवोत्पत्तेस्तादृशस्थलेच नीलप्रकारतानिरूपितविशेष्यताभिन्नवन्हिविधेयतानिरूपितविशेष्यताव
छेदकतासंबंधेनानुमितिंप्रति नीलप्रकारतानिरूपितविशेष्यताभिन्नवन्हिव्याप्यप्रकारतानिरूपित धूमप
त्व८ विशेष्यतावछेदकैप्रत्यासत्यापरामर्शस्यहेतुत्वांतरकल्पनस्यावश्यकत्वात्॥ तत्रैववन्हिव्याप्यधूमोप्रकारतानि आवश्
न२ [redacted]न्नायानीलत्वावछिन्नप्रकारतानिरूपितकिंचिधर्मावछिन्नविशेष्यताभिन्नत्वस्यैवविशेष्यतायांनि
पर्वतो२ वेशनीयतयाऽनुपपत्यभावात्॥ नवमतेनीलवन्हिमानित्येतादृशानुमितिस्थलेहेतुत्वांतरकल्पनायाआ
वश्यकत्वेनीलोवन्हिव्याप्यवान्पर्वतोवन्हिव्याप्यवानित्यादिसमुहालंवनानंतरंनीलपर्वतोवन्हिमानित्ये तादृशा
२४सुंदरनीलपर्वतत्वंधर्मितावछेदकीकृत्यधूमाभावकोटिकस्य नीलपर्वतत्वंधर्मितावछेदकीकृत्यधूमकोटिक६५स्यज्ञानस्यनासंग्रहः॥ +२
तेन
पिर

नुमित्यापत्तिवारणात् ॥॥ यत्तु विशेष्यतावच्छेदकत्वप्रत्यासत्तिकल्पे तादृशासमुहालंबना नील पर्वतो वह्निमानि
 त्येतादृशानुमित्यापत्तिर्न संभवति ॥ अवच्छेदकतापर्याप्त्याश्रयत्वसंबंधेनानुमितिं प्रति तादृशसंबंधेन प
रामर्शस्य हेतुता तादृशासमूहालंबनस्थानीयविशेष्यतावच्छेदकताया विशिष्टे पर्याप्तत्वाभावात् ॥ तज्जन्या
न नुमितिविशेष्यतावच्छेदकतया विशिष्टपर्याप्तत्वासंभवादिति नु न संभवति विशिष्टस्यानतिरेके शुद्धमात्रं
अथ अवच्छेदकतापर्याप्त्यवच्छेदकत्वसंबंधेनानुमितिं प्रति तादृशसंबंधेन परामर्शहेतुता ॥ नीलपर्वतोव
न्हिमानित्यादौ नीलपर्वतत्वोभयत्वावच्छेदेन विशेष्यतावच्छेदकतायाः पर्याप्तिरिति तादृशसंबंधेन तथा स्य ५
ल८ विधानुमितिः ॥ तादृशोभयपर्यवोपपद्यते ॥ न चैतत्र संभवति ॥ तादृशोभयत्वस्य तथाविधपरामर्शीय
विशेष्यतावच्छेदकतापर्याप्ति[illegible]नवच्छेदकत्वादिति चेद् स्तोवमापाततः ॥ एवमपि पर्वतत्वविशिष्टनीला न४
वच्छिन्नविशेष्यताकपरामर्शात् तादृशानुमित्यापत्तिर्दुर्वारैव ॥ तादृशपरामर्शीयविशेष्यतावच्छेदकतायाउ
भयत्वावच्छेदेनैव पर्याप्तिसत्वात् ॥ वस्तुतस्तु ॥ अवच्छेदकताया व्यासज्यवृत्तित्वस्य निरस्तत्वात् ॥ नीलश्री

^वन्हिव्याप्य^ ३

पर्वतोवन्हिमानित्यादिज्ञानविशेष्यतावच्छेदकतायाअपिप्रत्येकमेवपर्याप्ततयातादृशप्रकारेशप्य।एवंतमसंभा।
विलइत्यलमसदाग्रहेण।।स्वावच्छेदकावच्छिन्नत्वमित्यत्रस्वावच्छेदकत्वंनिरवच्छिन्नंग्राह्यं।।अतोजातिमा^ध्व ^न्वन्हिव्याप्या २
नु ३ माभाववान्पर्वतो^धूमवानित्यादिज्ञानान्नानुमित्युपपत्तिः।।नचैवंजातिमान्वन्हिव्याप्यवान्नवेत्याकारक
परामर्शादप्यनुमित्यापत्तिरितिवाच्यं।।जातिमान्वन्हिव्याप्यवानित्यादिनिर्णयात्पर्वतोवन्हिमानित्यनु
ता मितिवारणायनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेनानुमितिंप्रतितादृशावच्छेदकसंबंधेनपरामर्शस्य ता
हेतुतायाकल्पनात्तादृशसंशयकालेतत्रएवतादृशानुमित्यापत्तिवारणसंभवात्।।जातिमान्वन्हिव्याप्य
वच्छेदकता वानित्याद्यौनुसमानविशेष्यतावच्छेदकत्वप्रत्यासत्याकार्यकारणभावांतरकल्पनान्नजातिमान्वन्हि
व्याप्यवानित्यादिनिर्णयकालेजातिमान्वन्हिमानित्यनुमित्यनुदयप्रसंगइत्याहुः।।अत्रज्ञानव्यक्तिभे
देनविषयताभेदानभ्युपगमेननिर्णयात्मकज्ञानीयविषयतायाअपितादृशोभयसंबंधेन^विशेष्य
ताविशि[illegible]त्वंमित्यनुपपत्तिसमाधानेव।।इदंपुनरत्रातिरहस्यमवधेयंसुधीभिः।।विशेष्यता

^संशयात्मकज्ञानीय^ २

वच्छेदकतासंबंधेनानुमितिं प्रति स्वीयवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्वनिष्ठभेदप्रतियो
गितानिरूपितस्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारतात्वसंबंधावच्छिन्नावच्छेदकत्वोभयसंबंधे निरूपक
न परामर्शं प्रति हेतुत्वं वह्निव्याप्यधूमवान्नवा महानसं वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य स्वावच्छिन्नवि
वाधितत्वा ५ शेष्यतानिरूपितधूमाभावप्रकारकत्वसंबंधेन पर्वतत्वाभावेन तादृशसंबंधावच्छिन्नपर्वतत्वनिष्ठप्र
तियोगितावच्छेदकताकभेदवत्त्वात्॥ स्वनिष्ठभेदप्रतियोगितानिरूपिततादृशसंबंधावच्छिन्नावच्छेदकताघटितो
[illegible]भयसंबंधेनासौ पर्वतत्वे वर्तते॥ अतो न तदुत्तरं पर्वतो वह्निमानित्याद्याकारकानुमित्यनुदयप्रसं
गः॥ एवं तस्य स्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारतानिरूपितत्वसंबंधेन महानसत्वविशिष्टत्वात् तादृशोभ
सं २ यसंबंधेनासौ महानसत्वे वर्तत इति न तस्मान्महानसं वह्निमानित्यादि आकारकानुमित्यापत्तिः॥ प्रतियोगितावच्छेदकत्वं नि
रवच्छिन्नं ग्राह्यं। तेन पर्वतो वह्निव्याप्यधूमवान्नवेति निश्चितसंदेहानामेव तादृ[illegible] संबंधेन [illegible] महानसत्वोभया
वच्छिन्नभेदत्वेपि न क्षतिः॥ तादृशाप्रसिद्धप्रतियोगितावच्छेदकतायाउभयत्वा[illegible]वच्छिन्नत्वात्॥ न च तादृशाधर्मवि श्री
वं ७

[illegible] शेषं धर्मितावच्छेदकीकृत्य कदाचिदपि धूमाभाववत्ताज्ञानेन जातं तादृशधर्मे [illegible] निरूढसंबंधावच्छिन्नप्रतियोगिता वच्छेद९
क[illegible]प्रसिध्या तत्र तादृशोभयसंबंधेन परामर्शाभावात्॥ तद्धर्मावच्छिन्नविशेष्यताकानुमित्यनुदयप्रसंगइतिवा
तु च्यं॥ तादृशानुमित्यैविरोधेन तत्धर्मान्यतमवृत्तित्वविशिष्टविशेष्यतावच्छेदकतासंबंधेनानुमितौ स्वावच्छेद
कावच्छिन्नत्वसंबंधेन धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यविशेष्यतावच्छेदकत्वप्रत्यासत्त्यापरा
मर्शस्य हेतुत्वांतरकल्पनादिति॥ एवं चात्र कार्यकारणभावे तत्तद्धर्मान्यतमान्यवृत्तिविशिष्ट्यं कार्यतावच्छेदकसं
संबंधे नीविशनीय [illegible] मित्यतो न व्यभिचारः॥ अथ विशेष्यतावच्छेदकताप्रत्यासत्त्यासत्तिकल्पहेतुतावच्छे
दकीभूतधूमत्वालोकत्वादीनां विशेष्य[illegible]तयात्र द्राहुल्येन कारणताबाहुल्यं॥ तथाहि॥ धूमत्वा
लोकत्वानां निशेष्यानि वेशे स्वावच्छेदकावच्छिन्नत्व स्वनिरूपितज्ञाननिरूपितत्वोभयसंबंधेन किंचिद्धर्मा
वच्छिन्नप्रतियोगिताक[illegible]भावप्रकारता निरूपितविशेष्यताविशिष्टान्यव्याप्यप्रकारतानिरूपितवि
शेष्यतावच्छेदकताप्रत्यासत्त्याज्ञानभेदेन [illegible]पभेदाभ्युपगमे॥ तदनभ्युपगमे तु स्वीय[illegible]कारता

हेतुत्वे निवेशस्यावश्यक

धर्मितावच्छेदक

×किंचिद्धर्मावच्छिन्नप्रतियोगिताक×१

१४ निरूपितविशेष्यतावच्छेदकं च स्वनिष्ठभेदप्रतियोगितानिरूपितस्वावच्छिन्नविशेष्यतानिरूपितव्याप्त्याभावप्रकारत्व
संबंधावच्छिन्नावच्छेदकत्वेन पक्षसंबंधेन परामर्शहेतुतावाच्या॥ तथा च वह्निव्याप्त्यात्मकाभाववान्वह्निव्याप्यधू स्य २
मवांश्च पर्वत इत्येतादृशज्ञानादनुमित्यनुदयप्रसंग इति धूमत्वादीनां विशिष्यैव निवेशनमावश्यकं॥ सामानाधिकर । विशेषा
ण्यप्रत्यासत्तिकल्पेन तु हेतुतावच्छेदकभेदेन न कारणताबाहुल्यं॥ विशेष्यहेतुतावच्छेदकमनिवेश्यैव स्वनिरूपित
प्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नत्वस्वनिरूपितज्ञाना- रूपितत्वोभयसंबंधेन पर्वत
त्वाद्यवच्छिन्नविशेष्यतानिरूपिताभावप्रकारताविशिष्टान्या पर्वतत्वावच्छिन्नविशेष्यता। तं निरूपिता
व्याप्यप्रकारताकधर्मविशिष्टज्ञानत्वरूप वह्निव्याप्यवत्तानिर्णयत्वेन ज्ञानभेदेन विषयताभेदाभ्युपगमे तु स्वाव भ्युपगमात् ॥१४
च्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रति तदन ४४
वत् २ योगितावच्छेदकताकभेदस्वावच्छिन्नव्याप्यप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन
किंचिद्धर्मविशिष्टज्ञानत्वरूपवह्निव्याप्यवत्तानिर्णयत्वेन पर्वतत्वाद्यवच्छिन्नविशेष्यताकत्व। न्यूनानुमितित्वा श्री

व॰ स्या॰

x वह्निव्याप्यधूमाभाववत्त्वस्य पर्वतवृत्त्यापत्तिं प्रति आपाद्यव्यतिरेकनिर्णयविषयता x २

वह्नि= [illegible] हेतुत्वसंभवात्॥ एवं च हेतुतावच्छेदकविशेष्यतावच्छेदकयोर्न्यूनाधिकभावस्यासत्त्वे तद्व्याप्य[illegible]च्छेद्यत्वया विशेष्य
तावच्छेदकत्वप्रसा स[illegible]न्तिकल्पे लाघवानवकाश इति चेन्नैवं। हेतुतावच्छेदकभेदेन परामर्शस्य हेतुत्वकल्पने मे वाचितं। अ
न्यथा वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानां हेतुत्वांतरकल्पने गौरवात्॥ मन्मते तु अनुमितिस्थले वह्निव्याप्यधू
मवत्तानिर्णयत्वादिना हेतुत्वकल्पने विषयमनिवेश्य तादृशापत्त्यनुमितिसा[illegible] न्हिव्याप्यधूमादिमत्तानिर्णय
त्व विशिष्टस्य अन्यतावच्छेदकत्वोपगमादेव तादृशकार्यकारणभावेनैवोपपत्तेरतिरिक्तकारणतायास्तत्राकल्पनात्
अथ वा एतन्मतेपि हेतुतावच्छेदकमनिवेश्यैव स्वावच्छिन्न x च्छेदकाव x त्वरूपनिरूपकज्ञाननिरूपितत्वत्वनिरू
पिता[illegible]भावविषयतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वे
तत्त्रितयसंबंधेन विशेष्यताविशिष्टाया विशेष्यताल दृन्मवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदक
त्वप्रसा सत्याशानत्वेन हेतुता कल्प्यते॥ प्रथमदलप्रवेशात् धूमाभाववत्[illegible]हानसंव[illegible]ह्निव्याप्यधूमवान्पर्व
त इत्येतादृशज्ञानीयपर्वतविशेष्यताया नासंग्रहः॥ द्वितीयदलप्रवेशात्तु निरुक्तज्ञानीयपर्वतादिविशेष्य
तापोस्तद[illegible]रितसंबंधेन ज्ञानांतरीयधूमाभावादिप्रकारतानिरूपितपर्वतादिविशेष्यत्वं विशिष्टत्वेपि न

x वह्निव्याप्याभावप्रकारतानिरूपिता x ०

१५ क्षतिः॥ तृतीयदलप्रवेशादालोकाभाववान्वह्निव्याप्यधूमवांश्चपर्वत इत्याकारकसमूहालंबनज्ञानीयधूमप्रका
रतानिरूपितपर्वतविशेष्यतायाः स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेनालोकाभा
वप्रकारतानिरूपितविशेष्यतावि[illegible]ष्टत्वेपिनक्षतिः॥तादृशविशेष्यताया आलोकाभावप्रकारतानिरूपित
विशेष्यतानिरूपितभावविषयतानि[illegible]पितप्रतियोगित्वप्रकारता[illegible]वच्छेदकालोकत्वावच्छिन्नप्रकारता
निरूपितत्वाभावेनतादृशत्रितयसंबंधेनालोकाभावप्रकारतानिरूपितविशेष्यतावैशिष्ट्याभावात्॥ज्ञानवि
षयताभेदेनतु विशेष्यताभावविशिष्टायास्वीयवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वमेवप
रामर्शस्यपक्षतावच्छेदकत्वमेवप
रामर्शस्यपक्ष्यासत्तिः॥ विशेष्यताभावकत्वस्वावच्छेदकत्वस्वनिरूपिताभावविषयतानिरूपितप्रतियोगिता
संसर्गावच्छिन्नप्रकारतानिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताकोग्राह्यः॥वह्निव्याप्यधूमाभाववन्
महानसं वह्निव्याप्यधूमवान्पर्वतइत्येतादृशज्ञानीयपर्वतविशेष्यतायास्तदीयमहानसविशेष्यता
याः स्वावच्छेदकावच्छेद्यत्वासत्त्वात्॥वह्निव्याप्यालोकाभाववान्वह्निव्याप्यधूमवांश्चपर्वतइत्येतादृश श्री

* घच्छेदकधर्मावच्छिन्नप्रकारता *२

भेदेन

तद्

स्थानीयपर्वतनिष्ठविशेष्यतायां च तदीयालोकाभावप्रकारतानिरूपितविशेष्यतायां च [illegible] मदत्तासत्त्वात् तादृशो
भयसंबंधावच्छिन्नप्रतियोगिताकस्वीयविशेष्यताभावविशिष्टत्वमक्षतमेव ॥ सर्वांशे निश्चयात्मकवह्निव्या
प्यधूमवान्पर्वत इत्याद्याकारकस्थानीयधूमप्रकारतानिरूपितविशेष्यतायां तादृशस्थानीयविशेष्यतायां तादृ
शसंबंधावच्छिन्नाभावो ऽधिकरणसंबंधावच्छिन्नाभाव एवेत्यवधेयं ॥ न चात्र मुख्यविशेष्यतात्वावच्छिन्नप्र
तियोगिताकाभावो निवेशयितुमशक्यः ॥ वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयविशेष्यतायां संशयात्म
कस्थानीयविशेष्यतायास्तादृशसंबंधेन सत्त्वाद्विशेष्यतात्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकस्वी
यविशेष्यताभावासत्त्वात् ॥ तत्स्थानीयविशेष्यतात्वावच्छिन्नाभावत्वेन तादृशाभावं निवेशयतेऽज्ञानहेतुत्वे चान ल
नुगम इति विशेष्यताप्रतियोगिताकाभावत्वेनैव तादृशाभावाः निवेशनीयाः ॥ इत्थं च संशयात्मकस्थानीय
विशेष्यतायामपि तादृशस्थानीयाभावप्रकारतानिरूपितविशेष्यतायाद्विवादिना तादृशोभयसंबंधावच्छि
न्नाभावसत्त्वात् इति [illegible] इति वाच्यं ॥ निरूपितत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकीभू
तविशेष्यतावृत्तिप्रतियोगिताकाभावत्वेन तादृशाभावानां निवेशात् ॥ उभयत्वावच्छिन्नाभावं प्रति

च योगितायां नि[illegible]पितत्वसंबंधेन स्वस्यानवच्छेदकत्वेन तादृशाभावमादायातिप्रसंगाभावात्॥ अत्र
१८ थैवमपि तज्ज्ञानीयपूर्वक्षणादिवृत्तित्वविशिष्टविशेष्यताभावमादायातिप्रसंगो दुर्वारः॥ तादृशाभावप्रति
योगितायां तज्ज्ञानस्याप्यवच्छेदकत्वात्॥ न चावच्छेदकतायात्र व्यासज्यवृत्तितया तत्र ज्ञानस्य न प्रति यो त्व
